कण्व—बेटी, जिसका मुँह दाभ की नोंक से चिरा देखकर घाव पुरने के लिये तू हिंगोट का तेल लगाती थी, जिसे तूने समा के चावल खिला खिला कर पाला है और अपने बेटे की तरह रक्खा है वह हिरन तेरा रास्ता नहीं छोड़ता।

व्याख्या—त्वया यस्य मृगस्य कुशानां दर्भाणां सूचिभिः ताडयाग्रैः विद्धे क्षते वदने व्रणनाशकं इङ्गुदीनां तापसतरूणां तैलं सिक्तं स अयं श्यामाकानां धान्यविशेषाणां मुष्टिभिः ग्रासैः परिवर्द्धितकः पालितः पुत्रकृतकः पुत्रत्वेन स्वीकृतः हरिणः तव पदवीं न मुञ्चति।

Note*—कुशसूचिविद्धे—कुशानाम् सूचिभिः विद्धे कुशसूचिविद्धे

—कुशा की नोक से चिरा हुआ ; pricked by Kusa points ; व्रणविरोपणम्—व्रणानाम् विरोपणम् शोधकम्—चोट को अच्छा करने वाला , healing ; न्यषिच्यत—सींचा गया ; was sprinkled ; श्यामाकमुष्टिपरिवर्धितकः—श्यामाकानाम् धान्यविशेषाणाम् मुष्टिभिः परिवर्द्धितक अनुकम्पयापोषितः—समा के चावल (खिला कर) पाला हुआ ; reared by (you) with handfuls of syamak grains ; पुत्रकृतकः कृतकः पुत्रः पुत्रकृतक—बेटे के समान पाला हुआ , adopted as son , पदवीम्—रास्ता—मार्ग ।

शकुन्तला वच्छ, किं सहवासपरिच्चाइणिं मं अणुसरसि । अचिरप्पसूदाए जणणीए विणा वड्ढिदो एव्व । दाणिं वि मए विरहिदं तुमं तादो चिन्तइस्सदि । णिवत्तेहि दाव । (इति रुदती प्रस्थिता ।)

[वत्स, किं सहवासपरित्यागिनीं मामनुसरसि अचिरप्रसूतया जनन्या विना वर्धित एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।]

Shakuntala—Child, why do you follow me when I am leaving all my companions ? You were brought up by me when you were bereft of your mother just after delivery ; now on being separated from me, you will be taken care of by my father. Do go back.

(Goes away weeping.)

शकुन्तला—अरे बच्चे, तू मेरे पीछे क्यों आता है ? मैं तो अपने सब संगी साथियों को छोड़ रही हूँ । तेरी मा पैदा होते ही तुझे छोड़ मरी तब मैंने ही तेरा पालन किया । अब मैं चली जाऊँगी तब पिता तेरी चिन्ता करेंगे । तू लौट जा ।

(आँसू डालती हुई चलती है)

Notes —सहवासपरित्यागिनीम्—सहवास परित्यजति या सा ताम्—साथ छोड़ने वाली leaving the company, अनुसरसि—पीछे पीछे आते हो ; follow me, अचिरप्रसूतया—अचिरम् प्रसूता या जननी तया अचिरप्रसूतयाजनन्या—तुरन्त पैदा किया है जिस माता ने उससे ; by the mother just delivered of you, The mother of the deer died just after delivery विरहितम्—वियुक्त, Separated ; निवर्तयस्व—लौट जाओ, go back

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥१७॥

अन्वय--उत्पक्ष्मणोः नयनयोः उपरुद्धवृत्तिम् वाष्पंस्थिरतया विरतानुबन्धं कुरु अलक्षितनतोन्नतभूमिभागे अस्मिन् मार्गे ते पदानि विषमीभवन्ति खलु ।

Kanva—With firmness stop the flow of tears which hinder the action of your eyes with upturned eyelashes ; because in this path, where you cannot mark the high and low portions of the ground, your footsteps fall uneven.

कण्व—धीरज बांध कर आंसुओं के प्रवाह को रोक, ये तेरी उठी हुई बरनियों वाली आँखों को देखने नहीं देते । यहाँ भूमि नीची है इससे रास्ते में तेरे पैर ऊँचे नीचे पड़ते हैं ।

व्याख्या—उद्गतानि पक्ष्माणि लोमानि ययोः तादृशयोः नेत्रयोः उपरुद्धा निरुद्धा वृत्तिः व्यापारः येन तथाभूत । अनेन

अश्रुजलस्य अधःपतनं निषिद्धम्। अश्रुजलं धैर्यं अवलम्ब्य विरतः निवृत्तः अनुबंधः प्रवाहः यस्य तथाविधं कुरु। यतः अलक्षितः बाष्पाकुलाभ्यां नेत्राभ्यां अदृष्टः नतः निम्नः उन्नतः उच्चश्च भूप्रदेशः यस्मिन् तादृशे अस्मिन् पथि तव पादनिक्षेपाः स्खलन्ति।

Notes.—उत्पक्ष्मणोः—उद्गतानि पक्ष्माणि ययोः तादृशयोः उत्पक्ष्मणोः—जिनकी बरौनियाँ उठी हुई हैं; whose eyelashes are turned up; उपरुद्धवृत्तिम्—उपरुद्धा व्याहता वृत्तिः व्यापारो येन तादृशम् उपरुद्धवृत्तिम्—जिसने नेत्र के कार्य को रोक दिया है; which has obstructed the operation of eyes; This qualifies बाष्पम्। स्थिरतया—धीरता से, by firmness; विरतानुबन्धम्—विरतः अनुबन्धः प्रवाहो यस्य तथाविधं विरतानुबन्धम् कुरु—प्रवाह को रोको—stop the flow of (tears) अलक्षितनतोन्नतभूमिभागे—अलक्षितः अदृष्टः नतः निम्नः उन्नतः उच्चश्च भूमिभागः यस्मिन् तस्मिन् अलक्षितनतोन्नतभूमिभागे—जहाँ ऊँची नीची जमीन नहीं दिखाई देती; where high and low places are not seen. This qualifies मार्गे। विषमीभवन्ति अविषमाणि विषमाणि सम्पद्यमानानि भवन्ति—लड़खड़ाते हैं; are not regular;

शार्ङ्गरवः—भगवन्, उदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र संदिश्य प्रतिगन्तुमर्हसि।

काश्यपः—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः।

(सर्वे परिक्रम्य स्थिताः।)

काश्यपः—(आत्मगतम्।) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः संदेष्टव्यम्। (इति चिन्तयति।)

शकुन्तला—(जनान्तिकम्।) हला, पेक्ख। णलिणीपत्तन्तरिदं पि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि दुक्करं अहं करेमि त्ति।

[हला, पश्य नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्यारौति दुष्करमहं करामीति ।]

Sharangrava—Revered Sir It is said that a beloved person should be escorted up to water side Here is the shore of the lake Will you please deliver message and return ?

Kanva—Then let us stop under the shade of the fig tree

(All go round and stand)

Kanva—(aside) what appropriate message should be sent by us to His Majesty Dushyanta ?

(Meditates)

Shakuntala—(aside) Friend, just see, the female chakrawak cries bitterly, being distressed at the separation of her mate—concealed by lotus leaves But I do what is difficult to be done

शार्ङ्गरव—हे महात्मा, सुनते हैं कि प्यारे जनों को जलाशय तक ही पहुँचाने जाना चाहिये । अब यह सरोवर का तट आगया । आप हमें सँदेसा देकर आश्रम को सिधारिये ।

कण्व—तो आओ इस बड़ की छाया में ठहर लें ।

(सब चल कर ठहरते हैं)

कण्व—(आप ही आप) माननीय दुष्यन्त के योग्य क्या सँदेसा हम भेजें ?

(सोचते हैं)

शकुन्तला—(सखी से धीरे धीरे) हे सखी, देख—चकवी कमल के पत्तों में छिपे प्यारे चकवे को देखे बिना आतुर होकर विलाप कर रही है। पर मैं कैसा कठिन काम करती हूँ ?

Notes—उदकान्तम्—उदकस्य अन्तः सीमा उदकान्तः—जलाशय तक ; up to waterside. स्निग्धजनः—प्यारा आदमी ; a dear person संदिश्य—सन्देश कह कर, having delivered your message क्षीरवृक्षच्छाया—एक प्रकार का वृक्ष a fig tree ; आत्मगतम्—अपने मन में ; to himself ; युक्तरूपम्—उचित ; appropriate—अतिशयेनयुक्तम् इति युक्तरूपम्। संदेष्टव्यम्—सम्+दिश+तव्य—नलिनीपत्रान्तरितम्—नलिनी पत्रे. कमलदलैः अन्तरितम् व्यवहितम् नलिनीपत्रान्तरितम्—कमल के पत्तों में छिपा ; concealed by lotus leaves ; सहचर—साथी ; companion, आतुरा—व्याकुल ; distressed.

अनसूया—सहि, मा एव्वं मन्तेहि। [सखि, मैव मंत्रय।]

एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं।
गुरुअं पि विरहदुक्खं आसाबन्धो सहावेदि ॥१८॥

[एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्
गुर्वपिविरहदुःखमाशाबन्धः साहयति ॥१८॥]

अन्वय—एषापिप्रियेण विना विषाद दीर्घतराम् रजनीं गमयति आशाबंधः गुरु अपि विरह दुःखम् साहयति।

Anasuya—Friend, Do not think so. Even she being separated from her mate, passes the night, appearing longer on account of sorrow. The tie of hope makes heavy pain of separation endurable.

अनसूया—सखी, यों मत कह !

दुःख के कारण लम्बी हुई रात को भी यह चकवी पति के बिना अकेली ही काटती है क्योंकि आशा का बन्धन बड़े भारी विरह दुःख को भी सहने के योग्य बना देता है।

व्याख्या—एषा चक्रवाकी अपि प्रियेण चक्रवाकेण विना विषादेन विषादपाण्डुरया दीर्घतरां पूर्वतो दीर्घत्वेन प्रतीयमाना रात्रिं यापयति। आशाबन्ध पुनः समागमस्य आशाया बन्धनं गुरु महत् अपि विरहदुःखं वियोगपीडां सहनयोग्यां करोति।

Note.—मैवम्—मा एवम्—इस तरह नहीं, not in this way. प्रियेण विना—बिना के योग में तृतीया होती है। गमयति—बिताती है, passes, गम+णिच्। विषाददीर्घतराम्—विषादेन दीर्घतराम्—दुःख से बड़ी, long through grief, गुरु—qualifies विरह दुःखम्—विरहका भारी भी दुःख; even heavy sorrow of separation, साहयति—सहाता है, makes to bear, सह+णिच्।

काश्यप—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्य।

शार्ङ्गरवः—आज्ञापयतु भवान्।

Kanva—Sharangrava, having introduced Shakuntla, you should speak to him thus on my behalf

Sharangrava—Let your Holiness give orders

कण्व—हे शार्ङ्गरव, शकुन्तला को आगे करके तू हमारी ओर से इस राजा से यों कहियो।

शार्ङ्गरव—आज्ञा दीजिये।

अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन

स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।

सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तद्वाच्यं वधूबन्धुभिः ॥१९॥

अन्वय—संयमधनान् अस्मान् आत्मनः उच्चैः कुलं च, विचिन्त्य अस्याः कथमपि अबांधवकृतां स्नेहप्रवृत्तिं च साधु विचिन्त्य त्वया इयं दारेषु सामान्यप्रतिपत्तिपूर्वकं दृश्याः अतः परं भाग्यायत्तम्; तत् खलु वधूबन्धुभिः न वाच्यम्।

Kanva—Having considered well that we have penance as our wealth, that your family is high and that the flow of affection of this maiden towards you was not in any way influenced by relatives, she deserves to be esteemed by you with a regard common to all wives More than this depends on fate and should not be expressed by wife's relatives.

कण्व—हे राजा, तू हमें तपोधनी और अपने को बड़ा कुलीन जानकर तथा जो प्रीति इसकी तुझ में बिना किसी बांधव के अनुरोध के हुई उसे सोचकर इस लड़की को सब रानियों के समान आदर से रखियो। हमारा इतना ही कहना है। इससे अधिक जो कुछ हो इसके भाग्य के अधीन है—लड़की के बन्धुओं के कहने योग्य नहीं है।

व्याख्या—संयमः तप एव धनं येषां तथोक्तान् अस्मान् पितृत्वेन सम्बन्धिनः साधु सम्यक् विचिन्त्य, आत्मनः स्वस्य उन्नत वंशं च विचिन्त्य, त्वयि अस्याः शकुन्तलायाः केनापि प्रकारेण तां त्वया अनुभूतां बांधवैः पितृमात्रादिभिः न कृतां बंधुजनानुरोध विनैव घटितां स्नेहप्रवृत्तिं अनुरागोदयं साधु विचार्य इयं शकुन्तला राजपत्नीषु साधारणगौरवपूर्वकं त्वया परिपालनीया। अस्मात् अधिकं दैवाधीनम् तत्खलु वधाःबंधुभिःपितृमातृप्रभृतिभिः न वक्तुमुचितम्।

Notes.—संयमधनान्—संयमः आत्मदमनम् एव धनं येषां ते संयमधनाः तान् संयमधनान्—संयम ही है धन जिनका, whose wealth is self restraint, अबान्धवकृताम्—बान्धवैः कृता बान्धवकृता न बान्धवकृता अबान्धवकृता—संबंधियों से न की हुई, not brought about by relatives, शकुन्तला का प्रेम स्वयम् किया हुआ था। स्नेहप्रवृत्ति—प्रेम—love ; साधु—अच्छी तरह ; well। दारेषु—स्त्रियों में ; among wives, दार शब्द हमेशा बहुवचनान्त होता है। सामान्यप्रतिपत्तिपूर्वकम्—सामान्या साधारणा तुल्या इत्यर्थं या प्रतिपत्ति. गौरवम् तत्पूर्वकम्—सब के बराबर equal to all ; भाग्यायत्तम्—भाग्य के आधीन depending on luck, अतः परम्—इसके आगे ; more than this

शार्ङ्गरवः—गृहीतः संदेशः।

काश्यपः—वत्से, त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तो लौकिकज्ञा वयम्।

शार्ङ्गरवः—न खलु धीमतां कश्चिद्विषयो नाम।

Sharangrava—I have grasped the message.

Kanva—Daughter, how are you to be instructed. Though we live in a forest, we are acquainted with the ways of the world

Sharangrava—Nothing can possibly be beyond the reach of an intelligent person

शार्ङ्गरव—यह संदेश मैंने समझ लिया।

कण्व—बेटी, अब तुझे भी शिक्षा देनी है। वनवासी होकर भी हम लौकिक व्यवहार जानते हैं।

शार्ङ्गरव—विद्वानों से क्या छिपा है।

Notes.—गृहीत '—समझ लिया ; grasped ; गृह+क्त
अनुशासनीया—शिक्षा देने के योग्य , able to be instructed
वनौकस —वने श्रोको गृहमेषाम् ते वनौकस :—वनवासी ; dweller
in the forest ; अविषय:—अज्ञात ; not known.

काश्यपः—सः स्मितः पतिकुलं प्राप्य—

शुश्रूषस्व गुरून्कुरु प्रियसखी वृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाःकुलस्याधयः ॥१८

कथं वा गौतमी मन्यते।

अन्वय :—गुरून् शुश्रूषस्व; सपत्नीजने प्रियसखीवृत्तिं कुरु
विप्रकृतापि रोषणतया भर्तुः प्रतीपं मास्मगमः; परिजने भूयिष्ठ
दक्षिणा भव; भाग्येषु अनुत्सेकिनी भव; एवं युवतयः गृहिणीप
यान्ति; वामाः कुलस्य आधयः।

Kanva—On reaching the house of your hus band from here, serve your superiors, have the be haviour of a dear friend towards your fellow-wives even though offended do not, out of anger, go against your husband ; be extremely polite towards attendants and never be puffed up in the time o prosperity ; thus young women get the title of matrons ; those who act contrary to this, are the banes of their families.

How does Gautami think ?

कण्व—बेटी, जब यहाँ से जाकर सुसराल में पहुँचो तबबड़े बूढ़ों की सेवा करना; सौतों के साथ प्रिय सखी का सा बर्ताव रखना, तेरा अपमान किया जाय तो भी गुस्सा होकर पति के प्रतिकूल कुछ मत करना, नौकर-चाकरों के साथ सरलता से रहना, सम्पत्ति के समय गर्व मत करना। जो युवतियाँ इस प्रकार रहती हैं वे गृहिणी का पद प्राप्त करती हैं और जो इससे उलटा चलती हैं वे अपने कुल को क्लेश देती हैं।

अच्छा, गौतमी की क्या राय है ?

व्याख्या—गुरून् पत्यु गुरुभूतान् सेवस्व समान एकः पतिर्यस्याः सा सपत्नी तासां जने समुदाये प्रियसख्याः सौहार्दस्य वृत्तिं व्यवहारं कुरु; भर्त्रा अपमानिता अपि कोपनतया पत्युः प्रतिकूल मागाम प्रतिकूलवर्तिनी मा भव। भृत्यवर्गे अत्यर्थं सरला भव। सम्पत्सु गर्वरहिता भव। अनेन प्रकारेण युवतयः गृहिण्याः पदं अधिकारं प्राप्नुवन्ति। विरुद्धाचारवत्यः वधवः कुलस्य यशस्य आधयः कलङ्कदायका भवन्ति।

कण्वस्तु तपोमहिम्ना लोकव्यवहारं विचार्य शकुन्तलायै उपदेशं दत्तवान्। किन्तु स्त्रीणां विषये स्त्रियः प्रमाणम्। अतः गौतमी स्वानुभवेन अस्मिन् विषये स्वमतं वक्तुमर्हति। गौतम्या मतस्य महत्त्वद्योतनाय उक्तं कण्वेन कथमिति। यथा मम उपदेशः वधूजनोचितो वर्तते न वा—अस्मिन् विषये गौतम्या स्वमतं प्रदर्शो कर्तव्यम्। वा विकल्पे।

Notes—शुश्रूषस्व सेवा करो, serve। सपत्नीजने—सपत्नीनाञ्जने सपत्नीजने—सौतों में, co-wives। समानः पतिः आसाम् इति सपत्न्यः। प्रियसखीवृत्तिम्—प्रियसख्याः वृत्तिम् प्रियसखीवृत्तिम्—प्रियसखी का व्यवहार—behaviour of a loving friend विप्रकृता—अवमानिता; अपमानित होकर; being—insulted। रोषणतया—कोप से; through anger। प्रतीपम्—प्रतिकूल, against। परिजन—सेवक servants

भूयिष्ठम् —ज्यादा ; extremely । दक्षिणा—उदारा—उदार ; generous । भोगेषु—सम्पत्ति में ; in prosperity । अनुत्सेकिनी—अभिमान रहित ; without pride । गृहिणीपदम्—गृहिण्याः पदम् गृहिणीपदम्—status of a matron ; गृहिणी का पद । वामाः—प्रतिकूल चलने वाली ; the perverse आधयः—रोग; दुःख; banes ।

गौतमी—एत्तिओ वहूजणस्स उवदेसो । जादे, एद क्खु सव्व ओधारेहि । [एतावान्वधूजनस्योपदेशः । जाते, एतत्खलु सर्वमेव धारय ।]

काश्यपः—वत्से, परिष्वजस्व मां सखीजनं च ।

शकुन्तला—ताद, इदो एव्व किं पिअंवदामिस्साओ सहीओ णिवत्तिस्सन्ति । [तात, इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते ।]

काश्यपः—वत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य ।) कहं दाणिं तादस्स अङ्कादो परिब्भट्ठा मलअतडोम्मूलिआ चन्दणलदा विअ देसन्तरे जीविअं धारइस्सं [कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये ।]

Gautami—This advice is enough for a bride. Remember it well, my daughter.

Kanva—Embrace me as well as your friends

Shakuntala—Father, are Priyamvada and others to return from this very place ?

Kanva—Child, they are also to be given in marriage. It is not proper for them to go there. Gautami will go with you.

Shakuntala—(Embracing her father) How shall I support my life now in a foreign place, being removed from the arms of my father, like a sandal plant, uprooted from the side of the Malaya mountain ?

गौतमी—कुल बधुओं को इतनी ही शिक्षा काफी है। बेटी, इसे खूब ध्यान में रखना।

कण्व—बेटी, मुझसे और अपनी सखियों से मिल ले।

शकुन्तला—पिता, क्या प्रियंवदा आदि सखियाँ यहीं से लौट जायँगी ?

कण्व—बेटी, इन्हें भी विवाह में देना है। इनका वहाँ जाना उचित नहीं है। तेरे साथ गौतमी जायगी।

शकुन्तला—(कण्व से भेंट करके) अब मैं पिता की गोद से जुदी होकर मलयगिरि से उखाड़े हुए चन्दन के पौदे की भाँति परदेश में कैसे जीवन धारण करूँगी ?

Notes—एतावान्—इतना, So much। जाते—कन्या, daughter। अवधारय—याद रखो, remember। परिष्वजस्व—अंक लगाओ, embrace। प्रियंवदा मिश्रा—प्रियंवदा आदि, Priyamvada etc. प्रदेये—ब्याहने योग्य, have to be given in marriage स्त्रीलिङ्ग द्विवचन है (प्रथमा) मलयतटोन्मूलिता मलयतटात् उन्मूलिता इति—मलयगिरि से उखाड़ी हुई, plucked from the side of the Malaya देशान्तरे—अन्यो देश देशान्तर—परदेश a foreign land।

काश्यप—वत्से, किमेवं कातरासि।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥२१॥
(शकुन्तला पितुः पादयोः पतति)

यदिच्छामि ते तदस्तु ।

अन्वय.—वत्से, अभिजनवतः भर्तुः श्लाघ्ये गृहिणीपदे स्थिता तस्य विभवगुरुभिः कृत्यैः प्रतिक्षणं आकुला अचिरात् प्राची अर्क इव पावनं तनयं प्रसूय त्वं मम विरहजां शुचं न गणयिष्यसि ।

Kanva—Child, why are you so afraid ? Placed in the respectable position of a wife to a husband of noble birth; occupied every moment with several affairs, important on account of his dignity ; and having soon given birth to a holy son, just as the East does the sun ; you will not, my child, mind the sorrow, caused by separation from me.

(Shakuntala falls at her father's feet)

May all be realised that I wish for you !

कण्व—बेटी, ऐसी विकल क्यों होती हो?

जब तू बड़े कुलीन पति की गृहिणी के—प्रशंसा के योग्य—पद पर स्थित होगी और समृद्धि के कारण बड़े बड़े कार्यों में निरन्तर लगी रहेगी तथा थोड़े ही दिनों में पुत्र भी ऐसे जनेगी जैसे पूर्व दिशा सूर्य को जनती है तब तू मुझ से जुदे होने के दुःख की परवा नहीं करेगी ।

(शकुन्तला पिता के पैरों में गिरती है)

जो तेरे लिये मैं चाहता हूँ वह सब पूरा हो।

व्याख्या—हे वत्से, महाकुलीनस्य दुष्यन्तस्य स्पृहणीये महिषीपदे वर्तमाना तस्य पत्यु विभवेन समृद्धया गुरुभि महद्भिः कार्यैः क्षणे क्षणे व्यस्त शीघ्र पूर्वादिक् सूर्य इव पवित्रं पुत्रं उत्पाद्यस्व मद्वियोगभवां व्यथा न चिन्तयिष्यसि।

त्वदर्थे य ममाभीष्ट तत्सर्व सफलीभवतु । अभीष्टव "ययातेः" इत्यादिना श्लोकेनोक्तम्।

Notes—वत्से—बेटी, child। अभिजनवत—कुलीन, of a noble family। अभिजन मतुप्। श्लाघ्ये—प्रशंसनीय, praiseworthy। गृहिणीपदे—position of a wife, स्त्री के स्थान में। विभव गुरुभि—विभवेन समृद्ध्या गुरुभि. महद्भि. इति विभवगुरुभिः—समृद्धि के कारण बड़े, momentous through exuberance of wealth प्रतिक्षणम्—निरन्तरम्—बराबर, at every moment। अचिरात्—बहुत शीघ्र, very soon। प्राचीव—पूर्व दिशा के समान; like the east। पावनम्—पवित्र; pious; holy। प्रसूय—प्र+सू+ल्यप्—पैदा करके, giving birth to। अर्क—सूर्य, sun; विरह जाम्—विरहात् जाताम् विरहजाम्—वियोग जनित, caused by the separation+शुचम्—शोक; sorrow

शकुन्तला—(सख्यावुपेत्य।) हला, दुवे वि म समं एव्व परिस्सजह। [हला, द्वे अपि मां सममेव परिष्वजेथाम्।]

सख्यौ—(तथा कृत्वा) सहि, अइ णाम सो राआ पच्चहिण्णाणमन्थरो भवे तदा से इमं अत्तणामहेअङ्किअं अङ्गुलीअअं दसेहि। [सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्त तस्तस्येदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय।]

शकुन्तला—इमिणा सन्देहेण वो आकम्पिद म्हि। [अनेन संदेहेन वामाकम्पितास्मि।]

सख्यौ—मा भाआहि । सिणेहो पावसंकी । [मा भैषीः । स्नेहः पापशंकी ।]

शार्ङ्गरव—युगान्तरमारूढः सविता । त्वरतामत्र भवती ।

शकुन्तला—(आश्रमाभिमुखी स्थित्वा) ताद, कदाणु भूओ तवोवणं पेक्खिस्सं । [तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।]

Shakuntala—(approaching her friends) Both of you embrace me together.

Friends—(doing so) Friend, If by chance the King be slow in recognising you, show him this ring with the stamp of his name.

(They give the ring)

Shakuntala—I am made to shudder by this suspicion of yours.

Friends—Don't be afraid. Affection suspects evil.

Sharngarava—The sun has ascended the second division of the day. You are to make haste.

Shakuntala—(standing with her face towards the hermitage) Father, when shall I see the hermitage again ?

शकुन्तला—(दोनों सखियों के पास जाकर) आओ दोनों एक साथ ही मुझ से मिल लो

दोनों सखियाँ— (मिल कर) कदाचित् यह राजा तुम्हें पहचानने में आनाकानी करे तो यह मुँदरी, जिस पर उसका नाम खुदा है, दिखा देना।

(मुँदरी देती हैं)

शकुन्तला—तुम्हारे बहम से तो मैं काँप उठी ।

दोनों सखियाँ—कुछ डर की बात नहीं है। स्नेह में बुरी शंका होती ही है।

शार्ङ्गरव —अब सूरज दूसरे पहर में आगया। जल्दी करो।

शकुन्तला—(आश्रम की ओर मुँह करके खड़ी होती है) पिता, अब मैं फिर तपोवन का दर्शन कब करूँगी ?

Notes —सख्यौ—सखियों के पास, near the (female) friends। उपेत्य—आकर, going। उप+इण्+ल्यप्। सम्—साथ साथ, together, simultaneously, परिष्वजेथाम्—मिल लो, embrace। प्रत्यभिज्ञानमन्थर —प्रत्यभिज्ञाने मन्थर इति प्रत्यभिज्ञानमन्थर —पहचानने में आना कानी करने वाला—slow at recognition। आत्मनामधेयाङ्कितम्—आत्मन नामधेयेन अङ्कितम् इति आत्मनामधेयाङ्कितम् —उसके नाम से अङ्कित—stamped with his own name। दर्शय—दिखलाओ—show वामाकम्पितास्मि—वाम् आकम्पितास्मि वाम्—तुम दोनों के। of yours। आकम्पिता अस्मि—कम्पित (डर) हो रही हूँ। am startled। मा भैषी —डरो मत, do not fear। पापशङ्की—पाप की (बुराई की) शङ्का करने वाला (affection) suspects evil। युगान्तरम्—अन्य युग —दूसरा पहर, another stage

काश्यप—श्रूयताम्।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥२२॥

अन्वय :—चिराय चतुरन्तमहीसपत्नी भूत्वा अप्रतिरथं दौष्यन्तिं तनयं निवेश्य तदर्पितकुटुम्ब भरेण भर्त्रा सार्द्धं शान्ते अस्मिन् आश्रमे पुनः पदं करिष्यसि ।

Kanva—Listen, Having been for a long time the co-wife of the Earth, bounded on all sides by water, and having settled the son of Dushyanta, who will be without a rival, you will again enter this tranquil cottage with your husband when he has handed over the burden of the family to his son.

कण्व— सुन—

जब तू बहुत दिन तक चारों ओर समुद्र से घिरी हुई पृथ्वी की सपत्नी होकर रह लेगी और अपने—दुष्यन्त से पैदा हुए—शूर वीर पुत्र को राज्य दे लेगी तब तेरा पति कुटुंब का भार उसे सौंप देगा और तू पति के साथ फिर इस शान्ति-पूर्ण आश्रम में आवेगी।

व्याख्या—चिरकालपर्यन्तं चत्वारः अन्ताः प्रान्तभागा यस्याः तथाभूतायाः समस्तायाः पृथिव्याः एकभर्तृका भूत्वा नास्ति प्रतिरथः प्रतिपक्षः यस्य तं दुष्यंतस्याङ्गं पुत्रं निवेश्य अभिषिच्य तस्मिन् पुत्रे अर्पितः न्यस्तः कुटुंबस्य बान्धवजनस्य भरः भारः येन तादृशेन पत्या सार्धं शमप्रधाने अस्मिन् तपोवने पुनः वासं करिष्यसि। यार्धक्ये तनये राज्यभारं विन्यस्य भर्त्रा सह अत्रैव त्वया आगन्तव्यम् ।

Notes.—चिराय—बहुत काल तक; for a long time। चतुरन्त महीसपत्नी—चत्वारः अन्ताः प्रान्तभागाः यस्याः तथा विधायाः मह्याः सपत्नी इति चतुरन्तमहीसपत्नी—चारों ओर समुद्र से घिरी हुई पृथ्वी की सौत; the co-wife of the earth surrounded on all sides by the sea। दौष्यन्तिम्—दुष्यन्तस्य अपत्यम् पुमान् इति दौष्यन्तिः तम्।

दुष्यन्त+इम् । दुष्यन्त का लड़का। son of Dushyanta। अप्रतिरथम्—प्रतिगत रथ अस्य इति प्रतिरथः अविद्यमानम् प्रतिरथ यस्य तम् अप्रतिरथम्—बिना दुश्मन का, without a rival। निवेश्य—राज्ये स्थापयित्वा, राज्य देकर, having settled। तदर्पितकुटुम्बभरेण—तस्मिन् दौष्यन्तौ अर्पित निक्षिप्त कुटुम्बानाम् बान्धवानाम् भर पोषणक्रम येन तथा विधेन—उसे कुटुम्ब का भार देकर पति के साथ with him who has placed the burden of relatives on him। शान्ते—qualifies आश्रम। पुन पद करिष्यसि—फिर पदार्पण करोगी—take residence

गौतमी—जादे, परिहीअदि गमणवेला। णिवत्तेहि पिदरं। अहवा चिरेण वि पुणो पुणो एव्व मन्त इस्सदि। णिवत्तदु भवं। [जात, परिहीयते गमनवेला। निवर्तय पितरम्। अथवा चिरेणापि पुनः पुनरेवैव मन्त्रयिष्यते। निवर्तताम् भवान्।]

काश्यप —वत्से, उपरुध्यते तपोऽनुष्ठानम्।

शकुन्तला—(भूय पितरमाश्लिष्य।) तवचरणपीडिदं तादसरीरं ता मा अदिमेत्तं मम किदे उक्कण्ठिदुं। [तपश्चरणपीडितं तातशरीरम्। तन्मातिमात्रं मम कृते उत्कण्ठितुम्।]

Gautami—Child, the time of departure is passing away. Let your father return. Or even for a long time, she will go on speaking like this, let your reverence return

Kanva—Child, my practice of penance is being obstructed

Shakuntala—(embracing her father again) Your body has been emaciated by the practice of

penance. Don't therefore be much grieved on my account.

गौतमी—बेटी, अब चलने का मुहूर्त निकला जाता है। पिता को जाने दे। अथवा महात्मा जी, आप जाइये। यह तो देर तक बराबर ऐसे ही कहती रहेगी।

कण्व—बेटी, मेरे तप के अनुष्ठान में विघ्न होता है।

शकुन्तला—(पिता से फिर मिल कर) पिता, तुम्हारा शरीर तपस्या से दुबला हो गया है इस कारण मेरे लिए बहुत शोक मत करना।

Notes.—परिहीयते—बीतता जा रहा है ; is passing away। गमनवेला—गमनस्यवेला—जाने का समय ; time of departure। चिरेण अपि—बड़ी देर तक। for a long time। निवर्त्तताम्—लौट जाय। उपरुध्यते—विघ्न पड़ रहा है ; is obstructed। तपोऽनुष्ठानम्—तपसः अनुष्ठानम्—इति तपोऽनुष्ठानम् तपस्या का अनुष्ठान practice of penance। तपश्चरणपीडितम्—तपश्चरणेन पीडितम्—तपस्या से पीड़ित emaciated by practice of penance। अतिमात्रम्—अत्यधिक। excessively। ममकृते—मेरे वास्ते ; for my sake।

काश्यपः—(सनिःश्वासम्।)

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥२३॥
गच्छ। शिवास्ते पन्थानः सन्तु॥

अन्वय—त्वया रचितपूर्वं उटजद्वारविरूढं नीवारबलिं विलोकयतः मम शोकः कथं नु शमं एष्यति।

Kanva—(with a sigh) My child, How will my grief come to an end when I shall see the sacred

offering of Nivir grains previously mide by you and now sprouting up at the entrance of the cottage ?

You may go now ; may your path be free from trouble.

(Exeunt Shakuntala and the attendants)

काश्यप—(गहरी साँस लेकर) बेटी, पहले जो तू नीवार का उपहार दिया करती थी वह पर्णशाला के द्वार पर उग आया है। उसे देख कर मेरा शोक कैसे दूर होगा।

अब जा ; तेरा मार्ग सुखकारी हो।

(शकुन्तला और उसके साथी जाते हैं)

व्याख्या—हे वत्से, त्वया पूर्वं रचितं विहितं उटजस्य पर्णशालायाः द्वारे द्वारदेशे विरूढं अङ्कुरितं नीवारमयं पूजोपहारं पश्यतः मम शोकः कथं नु शान्तिं गमिष्यति कथमपि न गमिष्यतीत्यर्थः।

पंथानः मार्गाः शिवाः मङ्गलकराः सन्तु।

Notes.—रचितपूर्वम्—पूर्वम् रचितम् रचितपूर्वम्—पहले से बना हुआ, previously made। उटजद्वारि—उटजस्यद्वारि उटजद्वारि—कुटी के दरवाजे पर, at the door of the cottage। विरूढम्—अङ्कुरितम्—उगा हुआ, grown। नीवारबलिम्—नीवारमयम् बलिम्—नीवार का उपहार; offering of Nivara। विलोकयतः—वि+लुक +शतृ +शमम्—शान्तिम्—शान्ति। पन्थानः—रास्ता ; way। शिवाः—कल्याणकारी—safe।

सख्यौ—(शकुन्तलां विलोक्य) हद्धी हद्धी। अन्तलिहिदा

सउन्दला वणराईए । [हा धिक् हा धिक् । अन्तर्हिता शकुन्तला वनराज्या ।] ६

काश्यपः—(सनिःश्वासम्) [अनसूये, गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं मां (प्रस्थितः)

उभे—ताद, सउन्दलाविरहिदं सुण्णं विअ तवोवणं कहं पविसामो । [तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशामः ।]

काश्यपः—स्नेहप्रवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य) हन्त भोः, शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः ।

Friends—(looking towards Shakuntala.) Alas! Alas! Shakuntala is hidden by the trees of the forest.

Kanva—(with a sigh) Anasuya, your sister has gone. Restrain your grief and follow me back to the hermitage (Starts.)

Both—Father, How can we enter the hermitage which is, as it were, desolate without Shakuntala ?

Kanva—Your affection for her makes you think like this.

(Walking thoughtfully.)

Now that I have sent Shakuntala to her husband's house, I am free from anxiety ; because

दोनों सखियाँ—(शकुन्तला की ओर देखकर) हाय हाय ॥ वन के वृक्षों ने शकुन्तला को छिपा लिया ।

कण्व—(श्वास लेकर) हे अनुसूया, तुम्हारी सहेली गई। अब तुम शोक छोड़कर मेरे पीछे पीछे चली आओ। (चलते हैं)

दोनों सखियाँ—हे पिता, शकुन्तला बिना तो तपोवन सूना सा लगता है। इसमें कैसे चलें।

कण्व—ठीक है; प्रीति में ऐसा ही दीखता है।

Notes—अन्तर्हिता—छिप गई; is hidden। वनराज्या वन श्रेण्या; वन के वृक्षों से, by the forest trees। सनिश्वासम्—सांस लेकर, with a sigh। गतवती—चली गई, is gone। सहधर्मचारिणी—सह एकत्र धर्म चरति या सा सहधर्मचारिणी—सहेली, fellow worker in religion। निगृह्य—रोक कर, having checked। अनुगच्छ—पीछे पीछे आओ, follow (me)। शकुन्तला विरहितम्—शकुन्तलया विरहितम् शकुन्तलाविरहितम् शकुन्तला से रहित; deprived of Shakuntala। स्नेह प्रवृत्ति.—स्नेहस्य प्रवृत्तिः प्रवाह—स्नेह का प्रवाह, flow of affection। एव दर्शिनी—एव दर्शयति—ऐसा दिखाती है; shows thus। एव+दृश्+णिच्+णिनि।

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥२४॥

(इति निष्क्रान्ताः सर्वे।)

चतुर्थोऽङ्कः।

अन्वय—हि कन्या परकीय एव अर्थः; अद्य मम अन्तरात्मा अद्य तां परिग्रहीतुः संप्रेष्य प्रत्यर्पितन्यास इव प्रकामं विशदः जातः।

A girl is certainly another's property and having sent her today to her husband, my conscience has become free from anxiety as if I have restored a deposit. (Exeunt).

शकुन्तला को ससुराल भेजकर अब मैं निश्चिन्त हुआ क्योंकि बेटी पराया धन होती है। आज उसे पति के घर भेजकर मेरा अन्तःकरण ऐसा निश्चिन्त हो गया है जैसे किसी की धरोहर फेर दी हो।

(सब बाहर जाते हैं।)

व्याख्या—हि यतः कन्या परकीय एव परस्य अन्यस्य अर्थः धनम् अयम् एष मम अन्तरात्मा आभ्यन्तरम् स्वरूपम् अद्यतां-न्यासरूपाम् कन्याम् परिग्रहीतुः परिणेतुः संप्रेष्य विसृज्य प्रत्यर्पितन्यास प्रत्यर्पितः निर्यातितः न्यासः निक्षेपो येन तथाविधः इव प्रकामम् पर्याप्तम् विशदः प्रसन्न. जातः परधनरक्षणचिन्तया दुर्दिनमप्रसन्नम् चेतः अद्य प्रसन्नम् जातम्।

Notes.—परकीय—दूसरे का; of another। अर्थ—धन; property। परिग्रहीतुः—स्वामी के पास to the husband। संप्रेष्य—भेज कर; having sent; प्रकामम्—ज्यादा; very much। विशदः—प्रसन्न; happy। प्रत्यर्पितन्यास—प्रत्यर्पितः न्यासः येन सः प्रत्यर्पितन्यास—धरोहर फेरने वाला; one who has restored a deposit।

Model Questions with answers
Intermediate Examination, 1927

(1) Translate into English

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिम् सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्मप्रतीपं गम
भूयिष्ठम् भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयः वामाः कुलस्याधयः ॥

कथ वा गौतमी मन्यते ।

(2) Give in Simple English or Sanskrit the purport of the following

यास्यत्यद्य शकुन्तलेति हृदयम् संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्
वैक्लव्यम् मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथ नु तनयाविश्लेषदुःखैर्नवैः

(3) Explain the following in Sanskrit giving the context

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्
सामान्यप्रतिपत्तिपूर्वकमियम् दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥

(4) (a) Expound and name the samasas in सपत्नीजने question (1) and तनयाविश्लेषदुःखैः (q2)

(b) Conjugate the roots of शुश्रूषस्व in lit first person only and मन्यते in लुङ् third person only.

(c) Decline the bases of वारिषु in द्वितीया only and चक्षुर्भिः in सप्तमी only.

(d) Write grammatical notes on भागधेय Q 3.

(e) Derive भूयिष्ठम् in Q 2 and ईदृशम् in Q 3.

Answers 1927

Having reached thy husband's residence from hence, thou shouldst always wait upon thy superiors; shouldst adopt the behaviour of a loving friend towards the group of thy cowives; shouldst not through peevishness go against thy husband even if insulted; shouldst be extremely courteous towards thy attendants, shouldst be without arrogance in enjoyments. Thus do young females reach the status of matrons. The perverse are the banes of their family. How does Gautami think ?

(2) When Shakuntala was about to go to her husband's home Kanva expressed his sorrow telling:—"Because Shakuntala will go today my heart is filled with grief, my tears have been checked and so I cannot speak a word and my senses have been paralysed with anxiety. If such is my helplessness who am an ascetic, how alas, are the householders afflicted by the grief of first parting with their daughters. It means that the sorrow of householders is unbearable when their daughters, leaving their fathers' home go to their husband's home.

शकुन्तलाया पतिगृहगमनकाले कण्वः कथयति—अद्य शकुन्तला यास्यति इति विचिन्त्य मे हृदयं दु खेन उत्कण्ठितम् चिन्तया मे दर्शन शक्तिः गता अश्रुप्रवाहस्य अवरोधेन अहं वक्तुमशक्त यदि स्नेहात् मम इयम् अवस्था जाता तर्हि गृहिण दु दु खेन अवश्य पीड्यन्ते।

3 यदा शकुन्तला पतिगृहम् गन्तुमनाहीत् तदा दुष्यन्त प्रति कण्वेन इदम् सदिष्टम्। शाङ्गरव कथयति मद्वचनात् न राजा शकुन्तलां पुरस्कृत्य वक्तव्य —

अस्मान् तपस्विन विचिन्त्य स्वस्य च उच्चै कुलम् च विचिन्त्य त्वयि अस्या शकुन्तलायाः कथमपि बन्धुजनप्रयास विनैव घटिता ताम् अतिशयिताम् स्नेहप्रवृत्तिम् प्रेमाधिक्यम् सम्यक् विचिन्त्य त्वया दुष्यन्तेन इयम् शकुन्तला अन्यम हिषीवत् द्रष्टव्या अत परम् अग्रेगोलमेदेन दर्शनात् परम् अधिकम् भाग्याधीनम् तत् खलु वधूबन्धुभि वक्ता बन्धुभि पित्रादिभि न वाच्यम् न कथनीयम्।

4 (a) सपत्नीजने—समान पति आसाम् इति सपत्न्य सपत्नीनाम् जने सपत्नीजने (ष० तत्पु)।

तनयाविश्लेषदु खे —तनयाया विश्लेष तनयाविश्लेष, तनया विश्लेषस्य दुःखे इति तनयाविश्लेषदु खे (ष० तत्पु०)।

(b) शुश्रूषस्व—यह सन्नन्त श्रुधातु के मध्यम पुरुष का रूप है। श्रोतु-मिच्छति शुश्रूषति लिट् ३ पुरुष में रूप -शुश्रूषयामास—शुश्रूषयामासतु शुश्रूषयामासुः या शुश्रूषयाञ्चकार etc

मन्यते—मन् धातु। लुङ् प्रथम पुरुष अमस्त—अमंसताम्—अमंसत।

(c) दारेषु—यह दार शब्द के सप्तमी का रूप है यह हमेशा बहु-वचनान्त होता है। द्वितीया में इसका रूप दारा होता है।

बन्धुभि —बन्धु शब्द के तृतीया का बहुवचन है। सप्तमी का रूप—बन्धौ—बन्ध्वो —बन्धुषु।

(d) माग्यायत्तं—भाग्ये आयत्तम् इति भाग्यायत्त। आयत्तम्—आ+यत+क्त कर्मणि

(e) भूयिष्ठम्—बहु (much) से इष्ठन् प्रत्यय लगा। इष्ठन् का यिष्ठ हो गया बहु का भू हो गया। दोनों को मिलाकर भूयिष्ठ बना। बहोर्लोपो भू च बहोः। इष्ठस्य यिट् च यह सूत्र है। इसी से बहु का भू बना और इष्ठन् का यिठ हो।गया।

Intermediate Examination, 1928

1. Name and characterise all the Sanskrit works written by Kalidasa.

2 Explain in Tika form the following:—

रम्यान्तरः कमलिनीहरितैः सरोभि
श्छायाद्रुमैर्नियमितार्कमरीचितापः
भूयात् कुशेशय रजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः

3. Give in English the purport of the following:—

✓अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा

4. Translate the following in English:—

✓ अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला
तनयमचिरात प्राचीवार्कम् प्रसूय च पावनम्
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि

5. (a) Give the derivation of मर्कः in Q. 2 and 4.

(b) Decline the base of पन्था in सप्तमी and of त्वम् in चतुर्थी

5 (d) Expound and name the Samasa in कुशेशयरजो मृदुरेणु

(e) What grammatical forms are the following —
मूयात्, सप्रेष्य मूयिष्ठम्, अचिरात्

(f) Account for the case ending in परिग्रहीतु Q (3)

Answers

1 See the Introduction

2 कमलिनीभि पद्मिनीभिः कमलवने हेतुभि हरितै श्यामलै सरोभि जलाशयै रम्याणि श्यामत्वसवधात् मनोहराणि अन्तराणि अवकाशा यस्मिन् तथा विध छायाप्रधाने द्रुमैः वृक्षै नियमित निवारित अर्कमरीचे रविकरस्य तापो यस्मिन् तथाविध अस्या शकुन्तलाया पन्थाः कुशेशय पद्मम् तस्य रजांसि परागा इव मृदव कोमलाः रेणव धूलय यस्मिन् शान्त अप्रचण्ड अनुकूल सहयायी च पवनो वातो यस्मिन् तथाविध च शिवश्च मङ्गलकरश्च भूयात्। अस्या वर्त्म मनोहरम् सच्छायञ्च आशास्महे सुखप्रयाणामपि तस्या भूयात् गमने वातोऽनुकूलो नातिचण्डश्च अस्तु कल्याणञ्च सर्वाङ्गीणं भवतु।

2 When Kanwa sent Shakuntala to her father in law's home he was relieved of his anxiety and he says —

A daughter is the property of another, I have sent her to-day to her father-in-law's home and now my heart has been relieved of a great anxiety As a man who returns the deposit of another is happy

after returning it, similarly I have become happy after sending her to her husband's home.

4. Placed in the proud position of the chief wife of your husband of distinguished ancestry; busy with his affairs that are momentous through exuberance of wealth and having soon brought forth a holy son as the East does the Sun thou shalt not, my child, mind the sorrow caused by separation from me.

5 (b) अर्क—अर्च्+क "कृदाधाराच कलिभ्यः क." "अर्कोर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ।

5 (c) पथिन् शब्द के सप्तमी में रूप—

पथि—पथोः—पथिषु। त्व में त्वद् शब्द है। इसका चतुर्थी का रूप—तुभ्यम्, ते—युवाभ्याम् वाम्—युष्मभ्यम् वः।

(d) कुशेशयरजोमृदुरेणुः—कुशे जले शेते इति कुशेशयम् कुशेशयस्य रजांसि इव मृदवः रेणवः यस्मिन् सः कुशेशयरजोमृदुरेणुः (म० मो०)।

(e) भूयात्—भू धातु के आशीर्लिङ्ग में प्रथमपु० एक वचन का रूप है।

सम्प्रेष्य अव्यय है। सम्+प्र+इष+ल्यप्।

अचिरात्—क्रिया विशेषण है।

(f) परिग्रहीतुः में सम्बन्ध सामान्ये षष्ठी है।

Intermediate Examination papers 1929

1. Describe, giving suitable illustrations the main characteristics of Kalidasa's poetry.

2. Explain the following in your own Sanskrit—

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः
अपघ्नन्तो दुरितं हव्यगन्धै
र्वैतानास्त्वां वह्नयः पावयन्तु

3. Translate the following into English

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तम् येन क्षपिततमसा मध्यमं धाम विष्णोः
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै
रत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥

4. Explain in English with reference to the context

(a) अर्थो हि कन्या परकीय एव

(b) स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव

(c) दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ।

5 (a) Explain the allusion in Q 3

(b) Give the लोट् 2nd person singular form of the root in अपघ्नन्तः and conjugate the root in पावयन्तु in लट् third person only.

(c) Decline the base of मूर्ध्नि in तृतीया and of धाम in सप्तमी only.

(d) What grammatical forms are the following: दधानाम् and परितः

(e) In what metre (छन्दस्) is the श्लोक in Q 3.

Answers

1. See Introduction

2. अमी दृश्यमानाः समिधः यज्ञकाष्ठानि सन्ति येषां ताद्दृशाः वेदिं यज्ञवेदिं परितः तस्याः समन्तात् क्लृप्तधिष्ण्याः क्लृप्तानि धिष्ण्यानि विहितानि स्थानानि येषां तथा विधाः विहितस्थानाः प्रान्तेषु पार्श्वेषु संस्तीर्णाः आस्तृताः दर्भाः कुशाः येषाम् तथा विधाः प्रान्तसंस्तीर्णदर्भाः वैतानाः वितानस्य यज्ञस्य इमे वैतानाः यज्ञियाः वह्नयः अग्नयः हव्यगन्धैः हव्यस्य आहुतेः गन्धैः पुनः पुनः घ्रातैः गन्धैः दुरितम् पापम् अपघ्नन्तः नाशयन्तः सन्त. त्वाम् पावयन्तु शोधयन्तु ।

3. See page 24 of the text

4. (a) अर्थोहि—These are the words spoken by कण्व। Having sent शकुन्तला to her husband he was relieved of a great responsibility for a daughter is not her father's property. She is the property of some one else (her husband) and hence she is like a deposit and just as a person is relieved of his responsibility when he hands over the deposit similarly कण्व was relieved of a great responsibility after sending her to her father-in-law's home.

(b) इमरिष्यसि etc —These are the words of दुर्वासा। When he came to the hermitage where शकुन्तला was living, he was not greeted by her for she was thinking of दुष्यन्त and hence she was absent-minded. At this he became angry and cursed शकुन्तला saying:—

He, of whom you are thinking so attentively will

not remember you though he will be reminded again and again As a drunkard does not remember what he says before drinking similarly he (दुष्यन्त) will also not remember (recognise you) though reminded again and again

(c) दुष्यन्तेनाहितम् etc —This is what the आकाशवाणी told कण्व। These words are repeated by प्रियम्वदा to अनुसूया when अनुसूया asked प्रियम्वदा as to how कण्व knew about the pregnancy of शकुन्तला then प्रियम्वदा said to her that this is what the आकाशवाणी told him—

O Brahman know that your daughter bears the seed put by दुष्यन्त for the good of the world as the sami holds fire within It is said that the Sami contains fire within just as the fire is hidden in the tree similarly the child is present in the foetus of शकुन्तला।

5 (a) The allusion in मध्यमम् धाम विष्णो —विष्णो मध्यमम् धाम is the sky when God went to Bali, the king of the demons, to beg of him three steps of land he was granted his request In order to cheat him वामन placed one step on the earth the other i e मध्यम धाम (step) on the sky Hence विष्णो मध्यम धाम is the sky

5 (b) अपघ्नन्त —अप+हन्+शतृ। मध्यम पुरुष एक वचन आज्ञा में रूप—जहि, हतात्।

पावयन्तु—पु धातु है। पुनाति पुनीत पुनन्ति।

(c) मूर्ध्न में मूर्धन् शब्द है तृतीया का रूप मूर्ध्ना मूर्धभ्याम् मूर्धभिः। यह पुल्लिङ्ग है।

धामन् शब्द—सप्तमी में रूप धाम्नि, धामनि—

धाम्नोः—धामसु यह नपुसंकलिङ्ग है।

(d) दधानाम्—धा धातु से शतृ प्रत्ययान्त रूप स्त्री लिङ्ग। कर्म कारक एक वचन। परितः परि+तस्—यह अव्यय है।

(e) प्रश्न तीन में मन्दाक्रान्ता छन्द है। उसका लक्षण है—मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौग युग्मम्

म, भ, न, त, त ग ग—मगण, भगण, नगण तगण तगण, गुरु गुरु

पादन्यासं क्षितिधर गुरोः मूर्ध्निकृत्वा सुमेरोः—

—गुरु

└लघु

Intermediate Examination, 1930

1. Translate the following into English.

   अन्तर्हिते शशिनि सैव कुमुद्वती मे
   दृष्टिं न नन्दयति संस्मरणीयशोभा
   इष्टप्रवासजनितान्यबलाजनस्य
   दुःखानि नूनमति मात्र सुदुःसहानि

2. Explain the following in your own Sanskrit.

   अनुमतगमना शकुन्तला तरुभिरियम् वनवासबन्धुभिः
   परभृतविरुत कलं यत. प्रतिवचनीकृतमेभिरात्मनः

3. Explain in English with reference to the text.

   (a) चूतेन संश्रितवती नवमालिकेयम्
   अस्यामहं त्वयि च संप्रति वीतचिन्तः

(b) भाग्यायत्त मत पर न खलु तद्वाच्य वधूबन्धुभि
(c) यान्त्येव गृहिणीपद युवतयो वामा कुलस्याधय

4 (a) Explain the allusion in
ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।

(b) Give the लिट् 3rd person singular form of the root in अन्तर्हिते

(c) What grammatical forms are the following
वीतचिन्त , प्रतिवचनीकृतम्

5 Mention a few characteristic features of the poetry of Kalidasa as found in Shakuntala Act IV

Answers

1 See the text

2 शकुन्तलाप्रस्थानकाले काश्यपस्येद वचनम् इयम् एषा प्रस्थानोन्मुखी शकुन्तला वनवासबन्धुभि वनवासस्य आश्रमवासस्थानस्य बन्धुभि स्निग्ध जनै तरुभि वृक्षै अनुमतगमना अनुमत गमन पतिगृह॰ यात्रा यस्या तथा विधा जाता अर्थात् सर्वे वृक्षा ये अत्र सन्ति ताम् पतिगृहगन्तुमाज्ञापयन्ति कथमेव ज्ञायते इत्याह यत् यस्मात् एभिः तरुभि कल मधुरम् परभृतस्य अन्यपुष्टस्य कोकिलस्य विरुत मञ्जुकूजितम् आत्मन स्वस्य प्रतिवचनम् प्रत्युत्तरम् अतत तत् सम्पद्यमानम् कृतम् । यदि अनभिमत स्यात् गृध्रवायसादीनाम् कटुरटितेन प्रत्युत्तरस्यात् कोकिलकल कूजितेन तु गमनमनुमन्यते

3 (a) When Shakuntala was going to her husband's home Kanwa told her " By fortune you have been united with a worthy husband and this creeper (Navamalika) has been united with the mango tree

Thus I have been relieved of my anxiety for you and for it."

(b) While Shakuntala was going to her father-in-law's home kanva sent a message to Dushyanta, Shakuntala's husband viz. " O king, thinking us to be ascetics and considering the affection which she has for you, you should honour her as you honour your other wives. More than that depends on luck and should not be expressed by the relatives of the wife". What Kanva means to say is that he won't say anything more for all depends on luck , he has told what he ought to have told

(c) While giving advice to शकुन्तला at the time of her departure Kanva says to her " serve you elders ; be generous and being provoked do not be angry etc." and giving her this advice he says " The females reach the status of matrons by cultivating these qualities and those who act otherwise are the banes of the family.

4 (a) ययाति was one of the founders of the Lunar race He had two wives देवयानी, the daughter of शुक्राचार्य the preceptor of the Danavas and शर्मिष्ठा the daughter of वृषपर्वन, the Danawa King. The latter was the favourite. Hence शुक्र cursed him, पुरु his youngest son by शर्मिष्ठा took upon himself the consequences of the curse and relieved his father and as a

reward of his devotion he obtained universal sovereignty

(d) अन्तर्हिते में 'धा' धातु है। इसका लिट्, प्र० पु० एक वचन में दधौ रूप होता है।

(c) वीतचिन्तः विगता चिन्ता यस्य सः वीतचिन्त ब० व्री० समास प्रथमा का एक वचन है।

प्रतिवचनीकृतम्—अप्रतिवचनम् प्रतिवचनम् कृतम् इति प्रतिवचनीकृतम् प्रतिवचन+च्वि+कृ+क्त। प्रथमा का एक वचन।

5 See Introduction

Intermediate Examination, 1932

1 Translate the following into English

आर्ये वः कुसुमप्रसूति समये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्

2 Explain the following in your own Sanskrit

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिम्
वाष्पम् कुरु स्थिरतया विहतानुबन्धम्
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति।

3. Explain in English with reference to the context.

(a) स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमम् कृतामिव

(b) तेजोद्वयस्य युगपद् व्यसनोदयाभ्याम्
लोको नियम्यत इवैष दशान्तरेषु।

1. See page 57 of text
2. See व्याख्या on page 71 of the text
3. (a) See answer to Q 4 b, 1929

(b) These are the words of the शिष्य when he was sent to see the time, he found that it was morning ; On one side the moon was setting and on the other the sun was rising and seeing this the शिष्य says—

By the simultaneous rise and fall of these two luminaries man is, as it were, reconciled in the changes of his condition

Questions

1. Translate the following in Hindi or English:

(a) हा धिक् । अप्रियमेव संवृत्तम् । कस्मिन्नपि पूजार्हे अपराद्धा शून्य हृदया शकुन्तला । न खलु यस्मिन् कस्मिन् अपि । एष दुर्वासाः सुलभकोपो महर्षिः तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः कोऽन्यो हुतवहाद्दग्धु प्रभवति ।

(b) derive अपराद्धा and name and expound the समास in शून्यहृदया and वेगबलोत्फुल्लया ।

(c) Account for the case ending in हुतवहात् and write grammatical notes on हुतवह ।

2. Translate in Hindi or English—

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरः सर एकतोऽर्कः
तेजोद्वयस्य युगपद् व्यसनोदयाभ्याम्
लोको नियम्यत इवात्मदशान्तरेषु ।

(a) Expound and name the समास in तेजोद्वयस्य, दशान्तरेषु।

(b) Explain in Sanskrit—

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्र सुदुःसहानि ।

3 Translate in Hindi or English

प्रतिबुद्धापि किं करिष्यामि । न मे उचितेष्वपि निजकार्येषु हस्तपाद प्रसरति । काम इदानीं सकामो भवतु । येनासत्यसन्धे जने शून्यहृदया सखी पदं कारिता । अथवा दुर्वासः कोप एष विकारयति अन्यथा कथं स राजर्षि तादृशानि मन्त्रयित्वैतावत्कालस्य लेखमपि न विसृजति ।

4 (a) Expound and name the समास in हस्तपादम् सकाम ।

(b) Conjugate the root of कारिता in लिट् first person

5 Explain in Sanskrit—

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतम्
निष्ठ्यूतश्चरणोपरागसुलभो लाक्षारसः केनचित्
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः.

(a) Derive निष्ठ्यूतः ।

(b) Expound and u ime the समास in the underlined

6 Translate in Hindi or English—

यस्य त्वया व्रणविरोपणमिङ्गुदीनाम्
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे

श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ।

7 (a) Conjugate the root of न्यषिञ्चत in लङ् and लिट् first person and the root of जहाति in लिट् second person.

(d) *Write grammatical* notes on पुत्रकृतकः ।

(c) Account for the case ending in त्वया ।

8 Write in not more than one page the summary of शकुन्तला Act IV.

Printed by Ramzan Ali Shah at the National Press, Allahabad.